# Vasudevakritam 2 Shri Krishna Stotram

# વસુદેવકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Vasudevakritam 2 Shri Krishna Stotram

File name : vasudevakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/3/13-2||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# વસુદેવકૃતં ૨ શ્રીકૃષ્ણસ્તોત્રમ્

વસુદેવ ઉવાચ ।
વિદિતોઽસિ ભવાન્ સાક્ષાત્પુરુષઃ પ્રકૃતેઃ પરઃ ।
કેવલાનુભવાનન્દસ્વરૂપઃ સર્વબુદ્ધિદૃક્ ॥ ૧૩॥

સ એવ સ્વપ્રકૃત્યેદં સૃષ્ટ્વાગ્રે ત્રિગુણાત્મકમ્ ।
તદનુ ત્વં હ્યપ્રવિષ્ટઃ પ્રવિષ્ટ ઇવ ભાવ્યસે ॥ ૧૪॥

યથેમેઽવિકૃતા ભાવાસ્તથા તે વિકૃતૈઃ સહ ।
નાનાવીર્યાઃ પૃથગ્ભૂતા વિરાજં જનયન્તિ હિ ॥ ૧૫॥

સન્નિપત્ય સમુત્પાદ્ય દૃશ્યન્તેઽનુગતા ઇવ ।
પ્રાગેવ વિદ્યમાનત્વાન્ન તેષામિહ સમ્ભવઃ ॥ ૧૬॥

એવં ભવાન્ બુદ્ધ્યનુમેયલક્ષણૈ-
ર્ગ્રાહ્યૈર્ગુણૈઃ સન્નપિ તદ્ગુણાગ્રહઃ ।
અનાવૃતત્વાદ્બહિરન્તરં ન તે
સર્વસ્ય સર્વાત્મન આત્મવસ્તુનઃ ॥ ૧૭॥

ય આત્મનો દૃશ્યગુણેષુ સન્નિતિ
વ્યવસ્યતે સ્વવ્યતિરેકતોઽબુધઃ ।
વિનાનુવાદં ન ચ તન્મનીષિતં
સમ્યગ્યતસ્ત્યક્તમુપાદદત્પુમાન્ ॥ ૧૮॥

ત્વત્તોઽસ્ય જન્મસ્થિતિસંયમાન્ વિભો
વદન્ત્યનીહાદગુણાદવિક્રિયાત્ ।
ત્વયીશ્વરે બ્રહ્મણિ નો વિરુધ્યતે
ત્વદાશ્રયત્વાદુપચર્યતે ગુણૈઃ ॥ ૧૯॥

સ ત્વં ત્રિલોકસ્થિતયે સ્વમાયયા
બિભર્ષિ શુક્લં ખલુ વર્ણમાત્મનઃ ।

સર્ગાય રક્તં રજસોપબૃંહિતં
કૃષ્ણં ચ વર્ણં તમસા જનાત્યયે ॥ ૨૦॥

ત્વમસ્ય લોકસ્ય વિભો રિરક્ષિષુ-
ર્ગૃહેઽવતીર્ણોઽસિ મમાખિલેશ્વર ।
રાજન્યસંજ્ઞાસુરકોટિયૂથપૈ-
ર્નિર્વ્યૂહ્યમાના નિહનિષ્યસે ચમૂઃ ॥ ૨૧॥

અયં ત્વસભ્યસ્તવ જન્મ નૌ ગૃહે
શ્રુત્વાગ્રજાંસ્તે ન્યવધીત્સુરેશ્વર ।
સ તેઽવતારં પુરુષૈઃ સમર્પિતં
શ્રુત્વાધુનૈવાભિસરત્યુદાયુધઃ ॥ ૨૨॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે પૂર્વાર્ધે તૃતીયાધ્યાયાન્તર્ગતં
વસુદેવકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૩/૧૩-૨॥

bhAgavatapurANa . adhyAya 10/3/13-2..

Proofread by PSA Easwaran

*Vasudevakritam 2 Shri Krishna Stotram*

pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*